# 5. सूक्तिमौक्तिकम्

---

**अभ्यासः**

**प्रश्न: 1. एकपदेन उत्तरं लिखत**
(क) वित्ततः क्षीणः कीदृशः भवति?
(ख) कस्य प्रतिकूलानि कार्याणि परेषां न समाचरेत्?
(ग) कुत्र दरिद्रता न भवेत्?
(घ) वृक्षाः स्वयं कानि न खादन्ति?
(ङ) का पुरा लघ्वी भवति?

**उत्तर:**
(क) अक्षीणः
(ग) प्रियवाक्यप्रदानेन
(ङ) सज्जनानां मैत्री
(ख) आत्मनः
(घ) फलानि

**प्रश्न: 2. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क) यत्नेन किं रक्षेत् वित्तं वृत्तं वा?
(ख) अस्माभिः (किं न समाचरेत्) कीदृशम् आचरणं न कर्त्तव्यम्?
(ग) जन्तवः केन तुष्यन्ति?
(घ) सज्जनानां मैत्री कीदृशी भवति?
(ङ) सरोवराणां हानिः कदा भवति?

**उत्तर:**
(क) यत्नेन वृत्तं रक्षेत्।
(ख) आत्मनः प्रतिकूलानि अस्माभिः आचरणं न कर्त्तव्यम्।
(ग) जनाः प्रियवाक्यप्रदानेन तुष्यन्ति।
(घ) सज्जनानां मैत्री पुरा लघ्वी वृद्धिमती च पश्चात् दिनस्य परार्द्धस्य छायेव भवति।
(ङ) मरालैः सह विप्रयोगः (वियोगः) सरोवराणां हानिः भवति।

**प्रश्न: 3. 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि, तानि यथोचितं योजयत**
'क' स्तम्भः — 'ख' स्तम्भः
(क) आस्वाद्यतोयाः — (1) खलानां मैत्री
(ख) गुणयुक्तः — (2) सज्जनानां मैत्री

(ग) दिनस्य पूर्वार्द्धभिन्ना — (3) नद्यः
(घ) दिनस्य परार्द्धभिन्ना — (4) दरिद्रः

**उत्तर:**
‘क’ स्तम्भः — ‘ख’ स्तम्भः
(क) आस्वाद्यतोयाः — (3) नद्यः
(ख) गुणयुक्तः — (4) दरिद्रः
(ग) दिनस्य पूर्वार्द्धभिन्ना — (1) खलानां मैत्री
(घ) दिनस्य परार्द्धभिन्ना — (2) सज्जनानां मैत्री

**प्रश्नः 4. अधोलिखितयोः श्लोकद्वयोः आशयं हिन्दीभाषया आङ्ग्लभाषया वा लिखत**

**(क) आरम्भगुर्वी क्षयिणी क्रमेण**
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।।

**उत्तर:**
(क) दुष्टों की मित्रता आरम्भ में बड़ी और क्रम से क्षीण (कम) होने लगती है। जैसे दिन के पूर्वाद्ध की छाया और सज्जनों की मित्रता दिन के परार्द्ध के समान पहले छोटी और फिर बड़ी होती है।

**(ख) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।।

**उत्तर:**
(ख) सभी प्राणी प्रिय बोलने से प्रसन्न होते हैं इसलिए प्रिय बोलने में क्या कंजूसी? प्रिय बोलकर सबको खुश रखना चाहिए।

**प्रश्नः 5. अधोलिखितपदेभ्यः भिन्नप्रकृतिकं पदं चित्वा लिखत**
(क) वक्तव्यम्, कर्तव्यम्, सर्वस्वम्, हन्तव्यम्।
(ख) यत्नेन, वचने, प्रियवाक्यप्रदानेन, मरालेन।
(ग) श्रूयताम्, अवधार्यताम्, धनवताम्, क्षम्यताम्।
(घ) जन्तवः, नद्यः, विभूतयः, परितः।

**उत्तर:**
(क) सर्वस्वम्
(ख) वचने

(ग) धनवताम्
(घ) परितः

**प्रश्नः 6. स्थूलपदान्यधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत**
(क) वृत्ततः क्षीणः हतः भवति।
(ख) धर्मसर्वस्वं श्रुत्वा अवधार्यताम्।
(ग) वृक्षाः फलं न खादन्ति।
(घ) खलानाम् मैत्री आरम्भगुर्वी भवति।

**उत्तरः**
(क) कस्मात् क्षीणः हतः भवति?
(ख) किं श्रुत्वा अवधार्यताम्?
(ग) के फलं न खादन्ति?
(घ) केषाम् मैत्री आरम्भगुर्वी भवति?

**प्रश्नः 7. अधोलिखितानि वाक्यानि लोट्लकारे परिवर्तयत**
यथा- सः पाठं पठति। — सः पाठं पठतु।
(क) नद्यः आस्वाद्यतोयाः सन्ति। — .............
(ख) सः सदैव प्रियवाक्यं वदति। — .............
(ग) त्वं परेषां प्रतिकूलानि न समाचरसि। — .............
(घ) ते वृत्तं यत्नेन संरक्षन्ति। — .............
(ङ) अहं परोपकाराय कार्यं करोमि। — .............

**उत्तरः**
(क) नद्यः आस्वाद्यतोयाः — सन्तु।
(ख) सः सदैव प्रियवाक्यं — वदतु।
(ग) त्वं परेषां प्रतिकूलानि न — समाचर।
(घ) ते वृत्तं यत्नेन — संरक्षन्तु।
(ङ) अहं परोपकाराय कार्य — करवाणि।

**परियोजनाकार्यम्**

(क) परोपकारविषयकं श्लोकद्वयम् अन्विष्य स्मृत्वा च कक्षायां सस्वरं पठ।

(ख) नद्याः एकं सुन्दरं चित्र निर्माय संकलय्य वा वर्णयत यत् तस्याः तीरे मनुष्याः पशवः खगाश्च निर्विघ्नं जलं पिबन्ति।

**उत्तरः**

**(क)**

(i) अष्टादशपुराणेषु व्यासस्य वचनद्वयम्
परोपकारः पुण्याय पापाय परपीडनम्।।

(ii) श्रोत्रं श्रुतेनैव न कुण्डलनेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन।।

**(ख)** नद्याः वर्णनम्

1. नद्यः पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छन्ति।
2. नद्याः बालुकायुक्ततटे हरिताः वृक्षाः भवन्ति।
3. नदीतटे वृक्षाणाम् उपरि विविधाः खगाः वसन्ति।
4. पक्षिणाम् कलरवैः, बालकानां क्रीडाभिः, जनानां वार्तालापैः नदीतटाः गुञ्जायमानाः भवन्ति।
5. तस्याः तीरे मनुष्याः खगाः पशवः च निर्विघ्नं जलं पिबन्ति तुष्यन्ति च।